श्रीसूक्तम्

Shri Suktam — Selected 15-Verse Core

Source: Internet Archive — Die Apokryphen des Rigveda (1906), Shri Suktam on printed pages 72–73. Also compared: Public Domain Mark 1.0; Sanskrit Wikisource — Rigveda Khila II, fixed comparison revision 364177 (CC BY-SA 4.0).

VERSE 1

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह॥१॥

Hiraṇyavarṇāṃ Hariṇīṃ Suvarṇarajatasrajām |
Candrāṃ Hiraṇmayīṃ Lakṣmīṃ Jātavedo Mamāvaha ||1||

VERSE 2

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्॥२॥

Tāṃ Ma Ā Vaha Jātavedo Lakṣmīmanapagāminīm |
Yasyāṃ Hiraṇyaṃ Vindeyaṃ Gāmaśvaṃ Puruṣānaham ||2||

VERSE 3

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्॥३॥

Aśvapūrvāṃ Rathamadhyāṃ Hastinādapramodinīm |
Śriyaṃ Devīmupahvaye Śrīr Mā Devī Juṣatām ||3||

VERSE 4

कांस्यस्मि तां हिरण्यप्रावारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥४॥

Kāṃsyasmi Tāṃ Hiraṇyaprāvārāmārdrāṃ Jvalantīṃ Tṛptāṃ Tarpayantīm |
Padme Sthitāṃ Padmavarṇāṃ Tāmihopahvaye Śriyam ||4||

VERSE 5

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मानेमिं शरणं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणोमि॥५॥

Candrāṃ Prabhāsāṃ Yaśasā Jvalantīṃ Śriyaṃ Loke Devajuṣṭāmudārām |
Tāṃ Padmānemiṃ Śaraṇaṃ Prapadye'lakṣmīr Me Naśyatāṃ Tvāṃ Vṛṇomi ||5||

VERSE 6

आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्या अलक्ष्मीः॥६॥

Ādityavarṇe Tapaso'dhi Jāto Vanaspatistava Vṛkṣo'tha Bilvaḥ |
Tasya Phalāni Tapasā Nudantu Māyāntarā Yāśca Bāhyā Alakṣmīḥ ||6||

VERSE 7

उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिं वृद्धिं ददातु मे॥७॥

Upaitu Māṃ Devasakhaḥ Kīrtiśca Maṇinā Saha |
Prādurbhūto'smi Rāṣṭre'smin Kīrtiṃ Vṛddhiṃ Dadātu Me ||7||

VERSE 8

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वान् निर्णुद मे गृहात्॥८॥

Kṣutpipāsāmalāṃ Jyeṣṭhāmalakṣmīṃ Nāśayāmyaham |
Abhūtimasamṛddhiṃ Ca Sarvān Nirṇuda Me Gṛhāt ||8||

VERSE 9

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥९॥

Gandhadvārāṃ Durādharṣāṃ Nityapuṣṭāṃ Karīṣiṇīm |
Īśvarīṃ Sarvabhūtānāṃ Tāmihopahvaye Śriyam ||9||

VERSE 10

मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥१०॥

Manasaḥ Kāmamākūtiṃ Vācaḥ Satyamaśīmahi |
Paśūnāṃ Rūpamannasya Mayi Śrīḥ Śrayatāṃ Yaśaḥ ||10||

VERSE 11

कर्दमेन प्रजा भूता मयि सम्भव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्॥११॥

Kardamena Prajā Bhūtā Mayi Sambhava Kardama |
Śriyaṃ Vāsaya Me Kule Mātaraṃ Padmamālinīm ||11||

VERSE 12

अप स्रवन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले॥१२॥

Apa Sravantu Snigdhāni Ciklīta Vasa Me Gṛhe |
Ni Ca Devīṃ Mātaraṃ Śriyaṃ Vāsaya Me Kule ||12||

VERSE 13

पक्वां पुष्करिणीं पुष्टां पिङ्गलां पद्ममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह॥१३॥

Pakvāṃ Puṣkariṇīṃ Puṣṭāṃ Piṅgalāṃ Padmamālinīm |
Sūryāṃ Hiraṇmayīṃ Lakṣmīṃ Jātavedo Mamāvaha ||13||

VERSE 14

आर्द्रां पुष्करिणीं यष्टिं सुवर्णां हेममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह॥१४॥

Ārdrāṃ Puṣkariṇīṃ Yaṣṭiṃ Suvarṇāṃ Hemamālinīm |
Candrāṃ Hiraṇmayīṃ Lakṣmīṃ Jātavedo Mamāvaha ||14||

VERSE 15

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्यो विन्देयं पुरुषानहम्॥१५॥

Tāṃ Ma Ā Vaha Jātavedo Lakṣmīmanapagāminīm |
Yasyāṃ Hiraṇyaṃ Prabhūtaṃ Gāvo Dāsyo Vindeyaṃ Puruṣānaham ||15||